तीर्थविशेषः । यथा, महाभारते ।३।८३।१५०।
"विमोचनमुपस्पृश्य जितमन्युर्जितेन्द्रियः ।
प्रतिग्रहकृतैर्दोषैः सर्व्वैः स परिमुच्यते ॥"
पुं, महादेवः । यथा, महाभारते ।१३।१७।५६।
"विमोचनः सुशरणो हिरण्यकवचोद्भवः ॥")

विमोहनं, क्ली, वैचित्त्यीकरणम् । विपूर्व्वमुहधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम् ॥ ( विमोहयतीति । वि+मुह+णिच्+ल्युः । विमोहके, त्रि । यथा, भागवते । ११ । २४ । ६ ।
"ततो विकुर्व्वतो जातो योऽहङ्कारो विमोहनः ॥" )

विमोहितः, त्रि, ( वि+मुह+णिच्+क्तः । ) मोहयुक्तः । मोहितः । यथा,—
"तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥"
इति देवीमाहात्म्यम् ॥

वि(बि)म्बं, क्ली, ( वी गत्यादिषु+"उल्वादयश्च ।" उणा० ४ । ९५ । इति वन् प्रत्ययेन निपातनात् साधुः । ) प्रतिबिम्बम् । कमण्डलुः । इति बङ्गसारोणादिवृत्तिः ॥ ( मूर्त्तिः । यथा, भागवते । ३ । २ । ११ ।
"प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् ।
आदायान्तरधाद्यस्तु स्वबिम्बं लोकलोचनम् ॥"
तथाच राजतरङ्गिण्याम् । ३ । ४६६ ।
"मेघवाहनभूभर्त्तृपत्न्या मिन्नाख्यया कृते ।
विहारेऽपि तया बुद्धबिम्बं साधु निवेशितम् ॥")
बिम्बिकाफलम् । तेलाकुचा इति भाषा । इति मेदिनी । वे, ७ ॥ (यथा, कुमारे । ३ । ६७ ।
"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥" )
अस्य पर्य्यायः । तुण्डिकेरी २ रक्तफला ३ बिम्बिका ४ पीलुपर्णी ५ । इत्यमरः ॥ ओष्ठी ६ बिम्बी ७ । इति रत्नमाला । बिम्बा ८ बिम्बकम् ९ बिम्बजा १० । इति शब्दरत्नावली ॥ अस्य गुणाः । पित्तकफच्छर्द्दिरक्तदाहकासकुष्ठनाशित्वम् । इति राजवल्लभः ॥ अपि च ।
"बिम्बी रक्तफला तुण्डी तुण्डिकेरी च बिम्बिका ।
ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥
बिम्बीफलं स्वादु शीतं गुरु पित्तास्रवातजित् ।
स्तम्भनं लेखनं रुच्यं विबन्धाध्मानकारकम् ॥"
इति भावप्रकाशः ॥

वि(बि)म्बः, पुं क्ली, (वी+"उल्वादयश्च ।" उणा० ४ । ९५ । इति वन्प्रत्ययेन साधुः । ) सूर्य्यचन्द्रमण्डलम् । इत्यमरः ॥ (यथा, प्रबोधचन्द्रोदये ६ अङ्के ।
"असौ त्वदन्यो न सनातनः पुमान्
भवान् न देवात् पुरुषोत्तमात् परः ।
स एव भिन्नस्त्वमनादिमायया
द्विधेव बिम्बं सलिले विवस्वतः ॥"
यथाच मार्कण्डेये । ८४ । १९ ।
"ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ॥"
मण्डलमात्रेऽपि । यथा, ऋतुसंहारे । १ । ४ ।
"नितम्बबिम्बैः सुदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥"
यथाच कुमारे । ७ । २२ ।
"आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेशः ॥" )

वि(बि)म्बः, पुं, ( वी+वन्प्रत्ययेन साधुः । ) कृकलासः । इति मेदिनी । वे, ७ ॥

वि(बि)म्बकं, क्ली, (बिम्ब+स्वार्थे कन् ।) चन्द्रसूर्य्यमण्डलम् । बिम्बिकाफलम् । इति शब्दरत्नावली ॥ ( सञ्चकः । साँच इति भाषा । यथा, नैषधे । २२ । ४७ ।
"विधिर्व्विधत्ते विधिना बधूनां
किमाननं काञ्चनसञ्चकेन ॥"
अत्र । "काञ्चनस्य सञ्चकेन बिम्बकेन ।" इति नारायणीटीका ॥ )

वि(बि)म्बजा, स्त्री, (बिम्बं फलं जायतेऽस्यामिति । जन्+डः । ) बिम्बिका । इति शब्दरत्नावली ॥

वि(बि)म्बटः पुं, सर्षपः । इति शब्दचन्द्रिका ॥

वि(बि)म्बा, स्त्री, ( बिम्बं फलमस्त्यस्यामिति । बिम्ब+अच् । टाप् । ) बिम्बिका । इति शब्दरत्नावली ॥

वि(बि)म्बिका, स्त्री, बिम्बम् । इत्यमरः ॥ (यथा,—
"तुम्बी रक्तफला बिम्बी तुण्डीकेरी च बिम्बिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
चन्द्रसूर्य्यमण्डलम् । इति शब्दरत्नावली ॥

वि(बि)म्बी, स्त्री, ( बिम्ब+गौरादित्वात् ङीष् । ) बिम्बिका । इति शब्दरत्नावली ॥ ( यथा,—
"काकादनीं चित्रफलां बिम्बीं गुञ्जाञ्च
धारयेत् ॥"
इति सुश्रुते उत्तरतन्त्रे ३२ अध्यायः ॥ )

वि(बि)म्बुः, स्त्री, गुवाकः । इति केचित् ॥

वि(बि)म्बोष्ठः } वि(बि)म्बौष्ठः } त्रि, ( बिम्ब+ओष्ठः । "ओत्वोष्ठयोः समासे वा ।" इति पाक्षिकोऽकारलोपः । ) बिम्बे इव ओष्ठौ यस्य । इति मुग्धबोधव्याकरणम् ॥

वियच्चारी, [न्] पुं, ( वियति आकाशे चरतीति । चर+णिनिः । ) पक्षी । इति शब्दमाला ॥ आकाशगामिनि, त्रि ॥

वियत्, क्ली, ( वियच्छति न विरमतीति । वि+यम+"अन्येभ्योऽपि दृश्यते ।" ३ । २ । १७८ । इति क्विप् । लौ चगमादीनामिति मलोपे तुक् ।) आकाशम् । इत्यमरः ॥ ( यथा, भागवते । ३ । ८ । ३३ ।
"तर्ह्येव तन्नाभिसरःसरोज-
मात्मानमम्भः श्वसनं वियच्च ।
ददर्श देवो जगतो विधाता
नातः परं लोकविसर्गदृष्टिः ॥"
द्यावापृथिव्यौ । अत्र द्विवचनस्य प्रयोगः स्यात् । यथा, तैत्तिरीयब्राह्मणे । १ । १ । ३ । २ ।
"द्यावापृथिवी सहास्ताम् । ते वियती अब्रूताम् ॥"
तथाच शतपथब्राह्मणे । ७ । १ । २ । २३ ।
"तयोर्व्वियत्योर्योऽन्तरेणाकाश आसीत् तदन्तरिक्षमभवत् ॥" * ॥ वि+या+शतृ । गमनशीले, त्रि । यथा, भागवते । ७ । ६ । १४ ।
"कुटुम्बपोषाय वियन्निजायु-
र्न बुध्यतेऽर्थं विहतं प्रमत्तः ॥"
तथा, तत्रैव । ८ । २१ । ३ ।
"वियद्वित्तस्य ददतो लब्धं लब्धं बुभूषतः ।
निष्किञ्चनस्य धीरस्य सकुटुम्बस्य सीदतः ।
व्यतीयुरष्टचत्वारिंशदहान्यपिबतः किल ॥"
"वियद्वित्तस्य वियतो गगनादिव उद्यमं विनैव दैवादुपस्थितं वित्तं भोग्यं यस्य । यद्वा वियत् व्ययं प्राप्नुवद्वित्तं भोग्यं यस्य ।" इति तट्टीकायां श्रीधरस्वामी ॥ )

वियद्गङ्गा, स्त्री, ( वियतो गङ्गा । ) स्वर्गङ्गा । इत्यमरः ॥

वियद्भूतिः, स्त्री, ( वियतो भूतिर्भस्मेव । ) अन्धकारः । इति त्रिकाण्डशेषः ॥

वियन्मणिः, पुं, ( वियतो मणिः । ) सूर्य्यः । इति हारावली ॥

वियमः, पुं, ( वि+यम+"यमः समुपनिविषु च ।" ३ । ३ । ६३ । इत्यप् । ) संयमः । इत्यमरः ॥ दुःखम् । इति स्वामी ॥

वियातः, त्रि, ( विरुद्धं निन्द्यं यातः प्राप्तः । ) निर्लज्जः । इत्यमरः ॥

वियामः, पुं, ( वि+यम+घञ् । ) संयमः । इत्यमरः ॥

वियुक्तः, त्रि, वियोगविशिष्टः । विपूर्व्वयुजधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, देवीभागवते ।२। ८ । १३ ।
"किं करोमि क्व गच्छामि मृता मे प्राणवल्लभा ।
न वै जीवितुमिच्छामि वियुक्तः प्रियया नया ॥")

वियोगः, पुं, ( वि+युज+घञ् । ) विच्छेदः । तत्पर्य्यायः । विप्रलम्भः २ विप्रयोगः ३ विरहः ४ । इति हेमचन्द्रः ॥ (यथा, भागवते ।८।१३ । ६ ।
"यस्य योगं न वाञ्छन्ति वियोगभयकातराः ।
भजन्ति चरणाम्भोजं मुनयो हरिमेधसः ॥")

वियोगभाक्, [ज्] त्रि, ( वियोगं भजते इति । भज+ण्वि ।) विच्छेदयुक्तः । यथा, नैषधे ।
"वियोगभाजोऽपि नृपस्य पश्यता
तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः
कुहूरुताहूयत चन्द्रवैरिणी ॥"

वियोगी, [न्] पुं, (वियोगोऽस्यास्तीति । वियोग+इनिः । ) चक्रवाकः । इति शब्दचन्द्रिका ॥ वियोगयुक्ते, त्रि ॥ (यथा, मार्कण्डेये ।२२।२५।
"ताः शोच्या या वियोगिन्यो न शोच्या या मृताः सह ।
भर्त्तुर्व्वियोगस्त्वनया नानुभूतः कृतज्ञया ॥")